# ॥ लक्ष्मी स्तोत्रम् - इन्द्रकृत ॥

s



# ॥ लक्ष्मी स्तोत्रम् ॥

## इन्द्र उवाच —

ॐ नम: कमलवासिन्यै नारायण्यै नमो नम:।
कृष्णप्रियायै सारायै पद्मायै च नमो नम:॥1॥

पद्मपत्रेक्षणायै च पद्मास्यायै नमो नम:।
पद्मासनायै पद्मिन्यै वैष्णव्यै च नमो नम:॥2॥

सर्वसम्पत्स्वरूपायै सर्वदात्र्यै नमो नम:।
सुखदायै मोक्षदायै सिद्धिदायै नमो नम:॥3॥

हरिभक्तिप्रदात्र्यै च हर्षदात्र्यै नमो नम:।
कृष्णवक्ष:स्थितायै च कृष्णेशायै नमो नम:॥4॥

कृष्णशोभास्वरूपायै रत्नपद्मे च शोभने।
सम्पत्त्यधिष्ठातृदेव्यै महादेव्यै नमो नम:॥5॥

शस्याधिष्ठातृदेव्यै च शस्यायै च नमो नम:।
नमो बुद्धिस्वरूपायै बुद्धिदायै नमो नम:॥6॥

www.ishtadev.com

वैकुण्ठे या महालक्ष्मीः लक्ष्मीः क्षीरोदसागरे।
स्वर्गलक्ष्मीरिन्द्रगेहे राजलक्ष्मीर्नृपालये॥7॥

गृहलक्ष्मीश्च गृहिणां गेहे च गृहदेवता।
सुरभी सा गवां माता दक्षिणा यज्ञकामिनी॥8॥

अदितिर्देवमाता त्वं कमला कमलालये।
स्वाहा त्वं च हविर्दाने कव्यदाने स्वधा स्मृता॥9॥

त्वं हि विष्णुस्वरूपा च सर्वाधारा वसुन्धरा।
शुद्धसत्त्वस्वरूपा त्वं नारायणपरायणा॥10॥

क्रोधहिंसावर्जिता च वरदा च शुभानना।
परमार्थप्रदा त्वं च हरिदास्यप्रदा परा॥11॥

यया विना जगत् सर्वं भस्मीभूतमसारकम्।
जीवन्मृतं च विश्वं च शवतुल्यं यया विना॥12॥

सर्वेषां च परा त्वं हि सर्वबान्धवरूपिणी।
यया विना न सम्भाष्यो बान्धवैर्बान्धवः सदा॥13॥

त्वया हीनो बन्धुहीनस्त्वया युक्तः सबान्धवः।
धर्मार्थकाममोक्षाणां त्वं च कारणरूपिणी॥14॥

www.ishtadev.com

यथा माता स्तनन्धानां शिशूनां शैशवे सदा।
तथा त्वं सर्वदा माता सर्वेषां सर्वरूपतः॥15॥

मातृहीनः स्तनत्यक्तः स चेज्जीवति दैवतः।
त्वया हीनो जनः कोऽपि न जीवत्येव निश्चितम्॥16॥

सुप्रसन्नस्वरूपा त्वं मां प्रसन्ना भवाम्बिके।
वैरिग्रस्तं च विषयं देहि मह्यं सनातनि॥17॥

वयं यावत् त्वया हीना बन्धुहीनाश्च भिक्षुकाः।
सर्वसम्पद्विहीनाश्च तावदेव हरिप्रिये॥18॥

राज्यं देहि श्रियं देहि बलं देहि सुरेश्वरि।
कीर्तिं देहि धनं देहि यशो मह्यं च देहि वै॥19॥

कामं देहि मतिं देहि भोगान् देहि हरिप्रिये।
ज्ञानं देहि च धर्मं च सर्वसौभाग्यमीप्सितम्॥20॥

प्रभावं च प्रतापं च सर्वाधिकारमेव च।
जयं पराक्रमं युद्धे परमैश्वर्यमेव च॥21॥

www.istadev.com

## फलश्रुति —

इदं स्तोत्रं महापुण्यं त्रिसंध्यं यः पठेन्नरः।
कुबेरतुल्यः स भवेद् राजराजेश्वरो महान्॥

सिद्धस्तोत्रं यदि पठेत् सोऽपि कल्पतरुर्नरः।
पंचलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम्॥

सिद्धिस्तोत्रं यदि पठेन्मासमेकं च संयतः।
महासुखी च राजेन्द्रो भविष्यति न संशयः॥

॥ इति श्रीब्रह्मवैवर्तमहापुराणे इन्द्रकृतं लक्ष्मीस्तोत्रं सम्पूर्णम् ॥

www.ishtadev.com